International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(1): 23-25
© 2026 IJMH
www.themultijournal.com
Received: 26-12-2025
Accepted: 13-01-2026
Publish : 14-01-2026

**जगदीशनन्दः**
शोधछात्रः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**जगदीशनन्दः**
शोधछात्रः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# हर्षदेवमाधवस्य क्षणे क्षणे इति काव्ये समाजतत्वम्

**जगदीशनन्दः**

बहुजन्मादनन्तरं बहुपुण्यवलेन मनुष्यजन्म जनाः प्राप्नुवन्ति । परन्तु दुःखस्य विषयः कतिपयानां जनानां (आतङ्कवादीनां/सन्त्रासवादीनां) क्रुरतायाः कारणात् अकारणादेव मृत्युपथं गच्छन्ति। काश्मीरं भारतस्य भूस्वर्गः इति उच्यते। यत्र जनाः गत्वा हिमखण्डस्य, तत्रस्थ प्राकृतिकसौन्दर्यस्य च उपभोगं कुर्वन्ति। न केवलं भारतवर्षस्य अपितु भारतवर्षाद् बहिरपि जनाः तत्र गत्वा सानन्देन समयं यापयन्ति। ऐषमः अर्थात् २०२५ वर्षस्य अप्रेलमासस्य २२ तारिकायाम् एका घटना घटिता । अप्रेलमासे उष्णतायाः आधिक्यत्वात् जनाः काश्मीरं गत्वा हिमखण्डस्योपरि भ्रमणमकुर्वन् । जम्मुकश्मीरस्य पहलग्रामनिकटे पर्यटकानां भ्रमणसमये सहसा केचन संत्रासवादिनः आगत्य जनान् तेषां धर्मं पृष्ट्वा ये हिन्दुधर्मावलम्बिनः आसन् तेषामुपरि गुलिकावर्षणमकुर्वन् । प्रायशः षड्विंशति जनाः तत्र प्राणत्यागं कृतवन्तः । यद्यपि इयं घटना अधुना घटिता परन्तु एतेषां संत्रासवादिनां क्रुरता विषये कविः हर्षदेवः पूर्वमेव लिखितवान् यत्-

ते मूषकवत् प्रविष्टाः
व्याघ्रवत् परिक्रम्य शृगालवत् तामिस्रे पलायिताः[1]।।

वस्तुतस्तु संन्त्रासवादिनः भीरुजनाः भवन्ति। यतोहि यदा तत्र केऽपि सैन्यवाहिन्यः न तिष्ठन्ति तस्मिन्ने समये ते एतादृशं घृण्यकर्म कुर्वन्ति । पाकिस्तानतः ते भारतं प्रति मूषकवत् प्रविशन्ति । यतोहि तेषां गमनसमये यदि वि.एस्.एफ्. आरक्षिजनाः ज्ञास्यन्ति तर्हि ते तत्रैव तेषामुपरि गुलिकावर्षणं करिष्यन्ति। पुनश्च प्रवेशादनन्तरं व्याघ्रवत् पराक्रमं कृत्वा आक्रमणं कृत्वा शृगालवत् अन्धकारे आत्मानं गोपयन्ति । परन्तु ते न चिन्तयन्ति तेषामाक्रमणेन कस्यापि परिवारस्य दीपः निर्वापितः भवतीति। यस्य एकः पुत्रः मृत्युवरणं करोति चेत् तस्य वंशस्य नाशः भवति । संन्त्रासवादिनाम् आक्रमणेन पत्युः मृत्युकारणात् पत्न्याः सौभाग्यकङ्कणं विनष्टं भवति । पुत्रः वृद्धकाले पित्रोः सहायकः भविष्यतीति या भावना सा भावनाऽपि नष्टा भवति। यथा वृद्धानां यष्टिः सहायकः भवति तथैव पुत्रोऽपि। पुनश्च पितुः मृत्युकारणात् कस्यचित् बालस्य छत्रमपि नष्टं भवति। कविः कथयति-

कस्यापि गृहस्य दीपो निर्वापितः
कस्यापि हस्तस्य सौभाग्यकङ्कणं नष्टम्।
कस्यापि वार्द्धक्यस्य यष्टिः प्रभ्रष्टा
कस्यापि शैशवस्य छत्रं प्रणष्टम् [2]।।

संन्त्रासवादिनः न चिन्तयन्ति यत् तेषामाक्रमणकारणात् केषां का का हानिः जाता । ते तु निर्दयाः पाषाणसदृशाः भवन्ति । तेषां गुलिकावर्षणेन सर्वत्र रुधिररञ्जितः परिवेशः दृश्यते । परन्तु घटनायाः अनन्तरं यदा ते मूषकाः पलायन्ते तदा तां घटनां लोकाभिमुखीं कर्तुं छायाचित्रग्राहकाः, वार्ताहाराः अनुभूतनिद्रासुखाः उपस्थिताः भवन्ति। अनेन को लाभः ? जनाः केवलं समवेदनां ज्ञापयिष्यन्ति। परन्तु तेषां जीवनं पुनर्नागमिष्यति।

पद्येऽस्मिन् समाजतत्वस्य वर्णनया सह वीररसस्यापि व्यवहारः दृश्यते।

साम्प्रतिकीं परिस्थितिं दृष्ट्वा कविः स्वदृष्ट्या समाजे कथम् आयः व्ययश्च प्रचलति तस्मिन् विषये एकं पत्रकम् उपस्थापितवान् । पत्रेऽस्मिन् समाजे कथं कस्मादायः भवति तस्य व्ययः कुत्र क्रियते तस्मिन् विषये प्र तिपादनं भवति। यतोहि कविः स्पष्टवक्ता समाजसंस्कारकः समाजतत्वस्यौपस्थापकश्चास्ति।

कविः कथयति श्रमिकेभ्यः यत् आयः भवति तत् भ्रष्टाचारे व्ययः भवति । अकिञ्चनेभ्यः दरिद्रेभ्यः आनीय उत्कोचे व्ययः क्रियते । सर्वकारसेवकेभ्यः आनीय सर्वकारप्रधानविदेशप्रवासेषु व्ययः भवति। शोषितेभ्यः धनमानीय योजनानां कर्गजेषु व्ययः क्रियते । दुःखितेभ्यः आनीय कार्यालयेषु, सामान्यजनेभ्यः धनं संगृह्य वाहनेषु तस्य व्ययः क्रियते [3]।

वस्तुतस्तु सर्वकारः यदा कस्याः अपि याजनायाः प्रारम्भं करोति तदा तस्याः योजनायाः कृते धनं कुतः आगच्छतीति जनाः न चिन्तयन्ति । योजनायाः कृते दीयमानानि धनानि तेषामेवेति ते विस्मरन्ति । श्रमिकाः बहुश्रमं कृत्वा कार्याणि कुर्वन्ति, परन्तु भ्रष्टाचारकारणात् तेषां धनानि सद्कार्ये नैव योजितानि भवन्ति । योग्यजनाः सर्वकारस्य योजनायाः फलं न प्राप्नुवन्ति । ये उत्कोचं प्रयच्छन्ति ते एव योग्यत्वेन परिगण्यन्ते । सर्वकारस्य ये कर्मचारिणः सन्ति ते सर्वे सर्वकारस्य कृते आयकरं प्रयच्छन्ति । तेषां धनानि नीत्वा ये मुख्याः सन्ति ते विदेशे भ्रमणं कुर्वन्ति ।

यद्यपि समाजः आधुनिकतां प्रति गच्छति तथापि मनुष्येषु कुत्रचित् अमानविकतायाः वृद्धिर्भवति । अत्र कविः प्रदर्शयति यत् अधुना समाजे कानि कानि वस्तूनि वृद्धिं गतानि पुनश्च कानि न्यूनताम् । यथा अधुना समाजे शोषणं वर्धते । यस्य सविधे शक्तिर्भवति सः स्वेच्छया सर्वं कार्यं साधयति परन्तु यस्य सविधे शक्तिर्नास्ति सः किमपि कर्तुं न समर्थो भवति । अतः शोषणस्य क्रमशः वृद्धिर्भवति परन्तु सत्यस्य मूल्यं न्यूनता जाता । सर्वे सत्यं वदामि इति कथयन्ति परन्तु तेषु सत्यता नैव दृश्यते । यत्र कुत्रापि पश्यन्तु सर्वत्र सर्वेऽपि मिथ्यामेव आश्रयन्ति । अतः कवेः वचनानुसारं समाजे सत्यस्य न्यूनता दृश्यते । तथैव आजीविका अन्वेषणे कश्चन योग्यः भूत्वाऽपि असमर्थो भवति । यतोहि तस्य सविधे मानवशक्तेः अर्थशक्तेश्च अभावो वर्तते । यस्य सविधे एतत् सर्वं वर्तते सः अयोग्यः भूत्वाऽपि वृत्तिं प्राप्नोति । अनुदिनं दीनतायाः वृद्धिर्भवति । यद्यपि भारतवर्षे बहुकोटिपतिजनाः निवसन्ति येषां आयकरप्रदानेन देशं चलति तथापि एतादृशाः जनाः अपि सन्ति येषां सविधे स्वल्पाहारं कर्तुमपि धनं नास्ति । अतः सम्भ्रान्तजनानां कर्तव्यमस्ति यत् ते दरिद्राणां सहायतां कुर्य्युः, येन भारतवर्षे दीनतायाः दूरीकरणं सम्भवेत् । जनाः कार्यालयं प्रति आदौ पद्भ्याम्, ततः परं द्विचक्रिकायाम् अनन्तरं द्विचक्रयानेन क्रमशः कारयानेन गच्छन्ति । अर्थात् कार्यालयं प्रति गमनागमने सौविध्यं जातम् । परन्तु ते कार्यालये समुचितसमये न दृश्यन्ते । इतस्ततः भ्रमित्वा विलम्बेन गच्छन्ति । व्यवहारेऽपि शालीनता नैव दृश्यते । तेषां परिश्रमे न्यूनता दृश्यते । कार्यालयेषु यथा श्रमः करणीयः तथा ते नैव कुर्वन्ति । येन साधारणजनाः बहुकष्टं सहन्ते । वारम्वारं कार्यालयं प्रति गच्छन्ति । ते सर्वदैव श्वः आगच्छन्तु, परश्वः आगच्छन्त्विति कथयन्ति । यदि ते सम्यग्तया श्रमं करिष्यन्ति तर्हि सर्वेषाम् उपकारः भविष्यति ।

पुनश्च कविः कथयति मानवतायाः न्यूनता दृश्यते[4] । एतदपि सत्यमस्ति । यद्यपि विश्वे कोटिकोटिपरिमिताः जनाः निवसन्ति तथापि मानवतायुक्तमानवानां संख्या न्यूना अस्ति । मनुष्येषु मनुष्यत्वं न तिष्ठति चेत् तर्हि स किमपि कार्यं सम्यक् रूपेण न करिष्यति । यदा कश्चन मानवः स्वसामर्थ्यानुसारं कस्यचिदपरस्य मानवस्य सहायतां करोति तदा उपकृतजनः अवश्यमेव आशीर्वादं प्रददाति । मानवता प्रदर्शनाय साहसस्यापि आवश्यकता वर्तते । अहं नूनं करिष्यामि एतादृशीं भावनाम्, एतादृशं साहसं मनसि आगच्छति चेत् सः अवश्यमेव स्वकार्ये सफलो भविष्यति । जनेषु सेवायामपि आग्रहः क्रमशः न्यूनता दृश्यते । यत्र कुत्रापि भवतु नाम यस्या या सेवा सः यदि समुचितरूपेण न प्रददाति तर्हि अपरः जनः असौविध्यस्य सम्मुखीनं करोति ।

अतः पूर्वोक्तेषु स्थलेषु यत्र वृद्धेः आवश्यकता वर्तते तत्र वृद्धिः करणीया, यत्र न्यूनतायाः आवश्यकता तत्र न्यूनता । परन्तु वैपरित्यं दृश्यते । शोषणस्य न्यूनता करणीया तस्य तु वृद्धिर्भवति परन्तु सत्यस्य वृद्धिर्भवेत् प्रत्यूत तस्य न्यूनता दृश्यते । कवेः मतानुसारेण यदि एवं प्रचलिष्यति तर्हि अस्य अवशेषरूपेण अन्तिमे कशेरूका (Spine) रहितम् अर्थशास्त्रं स्थास्यति । यथा मनुष्यस्य मेरुदण्डः वक्रः भग्नः वा भवति चेत् तर्हि सः गमनागमनं कर्तुं न शक्नोति तथैव अर्थतन्त्रमपि पङ्गुवत् तिष्ठति । उक्तञ्च-

"अवशेषः कशेरुका (Spine) रहितम् अर्थतन्त्रम्[5]" ।

अतः प्रत्येकस्यापि मानवस्य परमं कर्तव्यमस्ति यत् कथं देशस्य आर्थिकमेरुदण्डः सुदृढः भवेत् तन्निमित्तं प्रयत्नः करणीयः ।

यद्यपि मानवः क्रमशः आधुनिकतां प्रति गच्छति तथापि तस्य मनसि अधिकप्राप्तेः आशा कदापि दूरं न गच्छति । कथं विना परिश्रमेण स्वल्पपरिश्रमेण वा अधिकं फलं मिलिष्यतीति चिन्तयन्तः मनुष्याः कुकार्येऽपि लिप्ताः भवन्ति । एतादृशे समाजे कुत्र किं किं विना क्लेशेन विना मूल्येन उपलभ्यते तस्मिन्विषये कविः उपस्थापयति । यथा-

अत्र उपलभ्यते विना हट्टं
किलोमितेन क्रयणेन सह
सार्धकिलोमिता वञ्चना[6] !

पूर्वं जनाः तराजुमाध्यमेन द्रव्याणां क्रयं विक्रयं च कुर्वन्ति स्म । तदा तेषां मनसि लोभः नासीत् । अतः ते सम्यक्तया समुचितपरिमाणस्य द्रव्यं प्रयच्छन्ति स्म । परन्तु अधुना क्रयणसमये संगणकतराजुमाध्यमेन द्रव्याणि प्रयच्छन्ति । जनाः चिन्तयन्ति अत्र तु कोऽपि वञ्चनां कर्तुं न शक्तोऽस्ति । परन्तु तथा न भवति । तस्मिन्नपि जनाः स्ववुद्धिवलेन वञ्चनां कुर्वन्ति । अत एव कविः कथयति किलोमितेन क्रयणेन सार्धकिलोमिता वञ्चना उपलभ्यते । पुनः तत्र द्रव्येषु अपि उत्तमगुणवत्ता न तिष्ठति । केचन दुष्टप्रकृतिजनाः द्रव्याणां नकलं कुर्वन्ति । तस्मिन् द्रव्ये केमिकाल् प्रभृतिं स्थापयन्ति, यत् स्वास्थ्यस्य कृते हानिकारकं भवति ।

कार्यालयं प्रति यदा कोऽपि जनः किमपि कार्यनिमित्तं गच्छति तदा एकस्मिन्नेव दिवसे तस्य कार्यसिद्धिर्न भवति । कार्यालयस्थाः कर्मचारिणः श्वः आगच्छन्तु परश्वः आगच्छन्त्विति कथयन्ति । ते वस्तुतः किमपि न कुर्वन्ति । यदि इच्छन्ति चेत् तत्क्षणमेव तस्य

जनस्य समस्यायाः समाधानं कर्तुं शक्नुवन्ति । परन्तु ते तथा नैव कृत्वा प्रतारयन्ति । कथयन्ति एतत् पूर्वमेव देयमासीत् । यदि वारम्वारं कोऽपि गच्छति चेत् ते उत्कोचमिच्छन्ति । अत्र मानवतायाः किमपि मूल्यं नास्ति । कविर्लिखति-

सर्वकारसेवानियुक्त्या सह
कार्यचौर्यं विना मूल्यम् अपि च
उत्कोचलाभोऽपि निःशुल्कः संयुक्तोऽस्ति[7] ।।

निर्वाचनसमये नेतारः आगत्य बहुलाभपूर्णाः कथाः कथयन्ति । यस्मिन् ग्रामे ते कदापि पादमपि न स्थापितवन्तः तस्मिन् ग्रामे भाषणं प्रयच्छन्ति यत् निर्वाचने विजयलाभात्परम् एवं करिष्यामि तथा करिष्यामि परन्तु निर्वाचनादनन्तरं ते तं ग्राममपि विस्मरन्ति । ते नेतारः यदा मन्त्रिपदं प्राप्नुवन्ति तदा ते भ्रष्टाचारे लिप्ताः भवन्ति । यत्र कुत्रापि यद्किमपि कार्यं भवतु ते सर्वस्मात् स्थानात् उत्कोचमिच्छन्ति । सम्पूर्णतया भ्रष्टाचारे लिप्ताः भवन्ति । कविः कथयति –

निर्वाचने विजयेन सह
भ्रष्टाचारस्य वर्तत उपहारयोजना[8] ।।

बहुपरिश्रमेण छात्राः विद्यामर्जयन्ति । यद्यपि शास्त्रे वर्तते ‘सा विद्या या विमुक्तये’[9] । परन्तु अस्य वचनस्य अधुना वैपरित्यं दृश्यते। अधुना कथ्यते सा विद्या या नियुक्तये । यदि विद्याऽध्ययनात्परं वृत्तिर्नास्ति चेत् तर्हि सर्वे उपहासं कुर्वन्ति । योग्यता नास्ति चेत् जनाः कथयन्ति अयोग्यः इति । यदा योग्यता आगच्छति तदा वृत्त्यर्थं सर्वे कथयन्ति । अतः कविः लिखति-

परीक्षाप्रमाणपत्रैः सह सङ्गताऽस्ति
वृत्तिप्राप्त्यर्थं चिन्ता[10] ।।

जनानां वारम्वारं कथनेन पठितस्य जनस्य चिन्ता भवति । प्रमाणपत्रस्य प्राप्त्यनन्तरम् अवश्यं वृत्तिप्राप्तिर्भवेदित्यर्थः । अत्र तेषामेव मूल्यमस्ति ये अर्थोपार्जने सक्षमाः सन्ति । नास्त्यत्र मानवतायाः किमपि मूल्यम् ।

पद्येऽस्मिन् कविः समाजे प्रचलितानां प्रकृतस्थितीनां विषये समाजतत्वस्य विषये च प्रतिपादितवान् ।

**सन्दर्भग्रन्थसूची**


| पुस्तकस्य मान | लेखकः | प्रकाशनसंस्था |
|---|---|---|
| 1. क्षणे क्षणे | डॉ. हर्षदेवमाधवः | खुश्बूप्रकाशन, अहमदाबाद |
| 2. श्वेताश्वतरोपनिषद् | | गीताप्रेस, गोरखपुर |


**पादटीका**

1. क्षणे क्षणे पृ - ७६
2. क्षणे क्षणे पृ - ७६
3. क्षणे क्षणे पृ - ८२
4. क्षणे क्षणे पृ - ८२
5. क्षणे क्षणे पृ - ८२
6. क्षणे क्षणे पृ - ८४
7. क्षणे क्षणे पृ - ८४
8. तत्रैव
9. श्वेताश्वतर उपनिषद् ५/१
10. क्षणे क्षणे पृ - ८४